# PAPER TERM - 1

## CLASS - +2

## SUBJECT - SANSKRIT

**Time : 3 hours** — **M.M. : 50**

**परीक्षा निर्देशा:- अस्मिन प्रश्न पत्रे चत्वार: खण्डा: सन्ति।**

**सर्वे प्रश्न: अनिवार्य: सन्ति।**

**प्रत्येक प्रश्न के अंक उसके सामने दिए गए हैं।**

### खण्ड-क

### अपठितांश अवबोधनम

1. **अधोलिखितं गद्यांश पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत:-**

भारते षट् ऋतव: भविन्त। वसन्तु:, ग्रीष्म:, वर्षा, शरद, हेमन्त: शिशिरश्च। तत्र ऋतुराज: वसन्त: अतीव मनोहर: वर्तते। वसन्त ऋतौ प्रात: सायं मन्द: सुगन्धश्च वायु: वहति। दिवसा: परिणामरमणीया: नात्युष्णा: नातिशीता: भवन्ति। अस्मिन् सर्वे प्रसन्ना: जायन्ते। ऋतुषु वसन्त: प्रथमं स्थानं लभते।

**प्रश्ना:-**

**क ) एकपदेन उत्तरत:-**

1. भारते तत्र क: अतीव मनोहर:?

**ख ) पूर्णवाक्येन उत्तरत:-**

2. भारते ऋतुनां नामानि लिखत?
3. 'प्रथमम् स्थानम्' इति पदे किं विशेष्यपदम्?
4. 'नातिशीता:' इति पदस्य विलोमपदं लिखत।

या

5. अस्य गद्यांशस्य समुचित शीर्षक लिखत। 4x1=4

2. **अधोलिखितं अनुच्छेदं पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत्:-**

भगवान श्रीकृष्ण: अर्जुनमुपादिशति-यथा नर: जीर्णानि वासांसि विहाय अपराणि नवानि गृहणाति तथा देही जर्णानि शरीराणि विहाय अन्यानि नवानि संयाति। जातस्य मृत्यु: ध्रुव: मृतस्य च जन्म ध्रुवम्। तस्मात् त्वम अपरिहार्यें अर्थे शोचितुम् नार्हसि अथ चेत् त्वम् इमं धर्म-संग्रामं न करिष्यसि तत: स्वधर्मं कीर्तिं च हित्वा एवं पापमवाप्स्यसि। अन्यच्च लोका: ते अकीर्ति कथयिष्यन्ति, अकीर्ति: च मरणात् अतिरिच्यते हतो वा स्वर्ग प्राप्स्यसि जित्वा वा महिं भोक्ष्यसे तस्मात् हे कौन्तेय त्वं युद्धाय कृतनिश्चय: उतिष्ठ।

**प्रश्ना:-**

**क ) एकपदेन उत्तरत:-**

1. हत: कौन्तेय: कं प्राप्स्यति?

**ख ) पूर्णवाक्येन उत्तरत:-**

2. देही केन प्रकारेण अन्यानि नवानि शरीराणि गृहणाति?
3. कौन्तेय इति पदस्य अग क: अर्थ:?
4. विहाय अत्र पदे क: उपसर्ग: कश्च प्रत्यय:?
5. जन्म इति पदस्य किं विलोमपदं प्रयुक्तम्?

या

अस्य अनुच्छेदस्य उचितम् शीर्षकम् लिखत।5x1=5

## खण्ड-ख ( रचनात्मक कार्यम् )

3. **प्रदत्त-शब्दसूचि-साहाय्येन उचितपदानि चित्वा रिक्त स्थान पूर्तिः करणीयाः-**

एकदा ............. एकः आहारार्थी ............. ग्रामं प्रविष्टः। तत्रव्याः ............. जम्बूकर्दशनेन जातरोषाः तं प्रत्यधावन्। सः जम्बूकः अपि प्राणरक्षणाय ............. प्रविष्टः। तत्र स्थापिते नीलीभाण्डे च . ............. ।अनन्तरं नीलवर्णं मनोहरं स्वशरीरं ............. मुदितमनाः शनैः बहिः निष्क्रान्तः। विचित्रवर्णं तम् अपूर्वसत्वं ............. कुक्कुराः अपि ............. दूरं पलायिताः।

**शब्दसूचिः-**

मन्यमानाः, जम्बूकः, रजकगृहं, विलोक्य, पतितः, कुक्कुराः, भयात्, सायंकाले। 8x½=4

## खण्ड-ग ( पठित अवबोधनम् )

4. **अधोलिखितं गद्यांश पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखतः-**

अपगते हि मनसि विशन्ति सुखेनोपदेशगुणाः। हरति अतिमलिन मपि दोषजातं गुरूपदेशः। गुरूपदेशश्च नाम अखिलमलप्रक्षाल नक्षमम् अजलं स्नानम् विशेषेण तु राज्ञाम् विरला हि तेषामुपदोत्रारः।

**क ) एकपदेन उत्तरतः-**

1. दोषजातं कः हरति?

**ख ) पूर्णवाक्येन उत्तरतः-**

2. केषाम् उपदोत्रारः विरलाः भवन्ति?
3. अंजलम् स्नानम् इति पदे कि विशेष्यम्?
4. 'दुःखेन' इति शब्दस्य किं विलोम पदम् अत्र प्रयुक्तम्?

या

'हरति' इति पदे कः धातुः प्रयुक्तः? 4x1=4

5. **अधोलिखितं पद्यांश पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखतः-**

तम्ध्वरे विश्वजिति क्षितीशं, निःशेषविश्राणित कोष जातम्।
उपात्तविद्यो गुरूदक्षिणार्थी, कौत्सः प्रपेदे वरतन्तुशिष्यः।।

**क ) एकपदेन उत्तरतः-**

1. वरतन्तोः शिष्यः कः आसीत?

**ख ) पूर्णवाक्येन उत्तरतः-**

2. राज्ञः अध्वरे कः किमर्थं प्रपेदे?
3. नृपः कम् अध्वरं कृतवान्?
4. 'नृपम्' इति पदस्य स्थाने किं पदं प्रयुक्तम्?

या

''प्रपेदे'' इति क्रियापदस्य को कर्ता? 4x1=4

6. **अधोलिखितं नाटयांश पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखतः-**

लवः- (प्रविश्य, स्वगतम्) अविज्ञातवयः क्रमौचित्यात् पूज्यानपि सतः कथं अभिवादयिष्ये? (विचिन्त्य) अयं पुनः अविरूद्ध प्रकारः इति वृद्धेस्यः श्रूयते (सविनयमु पसृत्यं) एष वो लवस्य शिरसा प्रणामपर्यायः।

अरून्धती जनकौ - कल्याणन् आयुष्मान् भूयाः।

कौसल्या-जात! चिरंजीव।

**क ) एकपदेन उत्तरत:-**

1. शिरसा प्रणामं क: करोति?

**ख ) पूर्णवाक्येन उत्तरत:-**

2. लव: किम् उक्त्वा प्रणामं करोति?
3. 'जात! चिरंजीव' इति का कथयति?
4. 'प्रविश्य' इति पदे क: प्रत्यय:?

या

'शिरसा' इति पदे का विभक्ति:? 4x1=4

**7.** (क) बाणभट्टस्य अथवा भवभूतेरूपरि हिन्दीभाषायां संक्षिप्त परिचयं लिखत।

(ख) 'विहायाऽमृतमश्नुते' अथवा 'कर्मगौरवम्' पठस्य सांर हिन्दीभाषायां लिखत। 2x2½=5

8. **वस्तुनिष्ठ प्रश्न: निम्नलिखित प्रत्येक प्रश्न 1 अंक का है, उसके चार विकल्प दिए जा रहे हैं, जिनमें से केवल एक सही है, इनमें से सही विकल्प लिखिए:-**

1. जगत्सर्व कीदृशम् अस्ति?

(क) ईशावास्यम् (ख) तमसाऽडवृतम्

(ग) मानवरहितम् (घ) जीवनशून्यम्

2. मन्त्रकृताम् अग्रणी क: आसीत्।

(क) रघु: (ख) कौत्स:

(ग) वरतन्तु: (घ) कुबेर:

3. अकर्मण: किं जयाय:?

(क) अकर्म (ख) कर्म

(ग) धनम् (घ) कार्यम्

4. चन्द्रापीडं क: उपदिशति?

(क) तारापीड: (ख) बाणभट्ट:

(ग) शुकनास: (घ) कस्यापि न

5. तृतीयरत्नेन किम् उत्पद्यते?

(क) राज्यसुखं (ख) चतुरङ्गबलं

(ग) आभूषणं (घ) अमृत तुल्यं भोजनं

6. राज्ञाम् उपदेष्टार: विरला: सन्ति। (प्रश्न निर्माण कुरूत)

(क) कीदृशम् (ख) कस्य

(ग) केषाम् (घ) कस्मात

7. उत्पथै: मम मन: पारिप्लवं धावति। (प्रश्न निर्माण कुरूत)

(क) कस्य (ख) केन

(ग) कम् (घ) किम्

8. कौत्स: वरतन्तो: शिष्य: आसीत्। (प्रश्न निर्माण कुरूत)

(क) केन (ख) कस्य

(ग) कस्मै (घ) कस्मात्

9. ''अश्नुते'' शब्दस्य क: अर्थ:?

(क) प्राप्त करना (ख) पकड़ना

(ग) कस्यापि न (घ) छोड़ना

10. समुद्रः हाले व्यथार्थ कानि रत्नानि ददौ?

(क) सप्त  (ख) षट्

(ग) पञ्च  (घ) चत्वारि

11. ''अमृतं'' शब्दस्य कः अर्थः?

(क) मूर्खता  (ख) सफलता

(ग) मृत्यु  (घ) अमरता

12. .......... यत् यत् .......... इतरः जनः तत् तत् एव। सः यत् प्रमाणं कुरूते .......... तत् अनुवर्तते। (सही विकल्प चुनिए)

(क) श्रेष्ठ, आचरति, लोकः

(ख) आचरति, श्रेष्ठः, लोकः

(ग) आचरति, लोकः, श्रेष्ठः

(घ) लोकः, श्रेष्ठः, आचरति

13. ''तीर्त्वा'' इति पदे कः प्रत्ययः?

(क) टाप्  (ख) क्त्वा

(ग) शानच्  (घ) ल्यप्  13x1=13

## खण्ड-घ

### अलंकार परिचयम्

9. **(क) क्योः द्वयोः अलंकारयो** लक्षणम् उदाहरणं संगति सहितं **लिखितः-**

अनुप्रासः, उत्प्रेक्षा, रूपकः। 2x2½=5

**(ख) बहुविकल्पीय प्रश्नाः-**

1. साधर्म्यम् ............ भेदे। (रिक्त स्थानं पूरयत)

(क) श्लेषः  (ख) उपमा

(ग) अनुप्रासः  (घ) रूपकः

2. ............सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना। (रिक्त स्थानं पूरयत)

(क) शिलष्टैः  (ख) भवेत्

(ग) गच्छेत  (घ) उपमानोपमेययोः

2x1=2